समृच्छते। संपृच्छते। संस्वरते। सङ्कल्पा अस्य समरन्त। अर्तेर्लुङि च्लेः 'सर्तिशास्त्यर्तिभ्यश्च' (३.१.५६/२३८२) इत्यङादेशः। तत्र [1]परस्मैपदेषु (३.१.५५/२३४३) [2]इत्येतन्नाश्रीयते। 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५/३५४६) [3]इत्याट् प्रतिषध्यते। 'ऋदृशोऽङि गुणः' (७.४.१६/३४०६) इति [4]गुणः––समरन्त। संशृणुते। संवित्ते। ऋच्छेरनादेशस्य ग्रहणम्, समृच्छिष्यते। अर्त्यादेशस्य त्वर्तीत्येव [5]सिद्धमात्मनेपदम्। अर्तिरुभयत्र पठ्यते, 'ऋ गतिप्रापणयोः' (धा.पा. ९३६) इति [6]भ्वादौ, 'ऋ सृ गतौ' (धा.पा. १०९८–१०९९) इति जुहोत्यादौ। [7]विशेषाभावाद् [8]द्वयोरपि ग्रहणम्। विदेर्ज्ञानार्थस्य ग्रहणम्[9] (धा.पा. १०६५), परस्मैपदिभिर्गमादिभिः साहचर्यात्, न लाभार्थस्य [10]स्वरितेत्त्वादुभयतोभाषस्य (धा.पा. १४३३)।

[४८] दृशेश्चेति वक्तव्यम्। (म.भा. १.२८२)

संपश्यते। अकर्मकात् इत्येव। ग्रामं संपश्यति[11]॥

## निसमुपविभ्यो ह्वः। (३०/२७०३)

अकर्मकात् इति निवृत्तम्। [12]अतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यम्। नि सम् उप वि इत्येवंपूर्वात् ह्वयते[13]र्धातोरात्मनेपदं भवति। निह्वयते। संह्वयते। उपह्वयते। विह्वयते। अकर्त्रभिप्रायार्थोऽयमारम्भः। [14]अन्यत्र हि ञित्त्वात् सिद्धमेवात्मनेपदम्।

[४९] उपसर्गादस्यत्यूह्योर्वा वचनम्। (म.भा. १.२८२)

निरस्यति, निरस्यते। समूहति, समूहते॥

## स्पर्धायामाङः। (३१/२७०४)

अकर्त्रभिप्रायार्थोऽयमारम्भः। स्पर्धायां विषये आङ्पूर्वाद् ह्वयतेरात्मनेपदं भवति। स्पर्धा सङ्घर्षः, पराभिभवेच्छा, स विषयो धात्वर्थस्य। धातुस्तु शब्दक्रिय एव। मल्लो मल्लमाह्वयते। छात्रश्छात्रमाह्वयते। स्पर्धमानस्तस्याह्वानं करोतीत्यर्थः। स्पर्धायाम् इति किम्? गामाह्वयति [15]गोपालः॥

## गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। (३२/२७०५)

[16]कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। गन्धनादिष्वर्थेषु वर्तमानात् करोते[17]रात्मनेपदं भवति। गन्धनमपकारप्रयुक्तं हिंसात्मकं सूचनम्। तथाहि, '[18]बस्त गन्ध अर्दने' (धा.पा. १६८४–१६८५), 'अर्द हिंसायाम्' (धा.पा. १८२९) इति[19] चुरादौ पठ्यते। अवक्षेपणं भर्त्सनम्। सेवनमनुवृत्तिः। साहसिक्यं साहसिकं कर्म। प्रतियत्नः सतो गुणान्तराधानम्। प्रकथनं प्रकर्षेण कथनम्। उपयोगो धर्मादि[20]प्रयोजनो विनियोगः। गन्धने तावत्––उत्कुरुते। [21]उदाकुरुते। सूचयति इत्यर्थः। अवक्षेपणे––श्येनो वर्तिका[22]मुदाकुरुते। भर्त्सयति इत्यर्थः। सेवने––गणकानुपकुरुते। महामात्रानु[23]पकुरुते। सेवते इत्यर्थः।

---

1. हि इत्यधिकम् ड. 2. एतत् नास्ति अ. 3. आट् नास्ति फ. 4. गुणः नास्ति फ. 5. सिद्धमेव क. 6. भूवादौ अ.ड.ह. 7. विशेषणाभावात् ह. 8. उभयोः क.फ. 9. भवति इत्यधिकम् फ. 10. स्वरितत्वात् क. 11. ग्रामं संगच्छति इत्यधिकम् अ.ह.ई, संगच्छते ब, संगच्छति ग्रामे ग. 12. इतः अ.ग. 13. धातोः नास्ति फ. 14. तत्र हि अ.क.फ, नास्ति ड. 15. गोपालः नास्ति अ, गोधुक् ह. 16. कर्त्रभिप्रायक्रियाफले ड. 17. धातोः इत्यधिकम् अ.क.फ. 18. वस्त नास्ति अ, वस् क, बन्धगर्ध ह. 19. च इत्यधिकम् क. 20. °प्रयोजने ब.ड. 21. उदाकुरुते नास्ति अ.ह. 22. अवकुरुते अ, अपकुरुते, निर्भर्त्सयति क. 23. प्रकुरुते क.